आभाणकमञ्जरी

रचयिता

श्री टी० वी० परमेश्वर अय्यर :

१९८१

देववाणी-परिषद्, दिल्ली

आभाणकमञ्जरी

प्रणेता
पं० टी० वी० परमेश्वर अय्यरः

१९८१

प्रकाशिका
देववाणी-परिषद्, दिल्ली
६, वाणी-विहारः, नयी दिल्ली-११००५९
(भारतम्)

आभाणकमञ्जरी

प्रणेता : टी० वी० परमेश्वर अय्यरः

प्रकाशिका : देववाणी-परिषद्, दिल्ली
६, वाणी-विहारः, नयी दिल्ली-११००५९

मुद्रकः : देववाणी प्रिंटर्स
उत्तम नगर, नई दिल्ली-११००५९

संस्करणम् : प्रथमम्, १९८१ ई०

मूल्यम् : पञ्चदश रूप्यकाणि, रु० १५.०० (भारते)
डालरपञ्चकं पौण्डद्वयं वा (विदेशेषु)

Ābhāṇakamañjarī

Author : Iyer, T. V. Parameswar

Publisher : Devavani Parishad, Delhi
6, Vani Vihar, New Delhi-110059

Printers : Dev Vani Printers
Uttam Nagar, New Delhi-110059

Edition : First, 1981

Price : Rs. 15.00 only (In India)
5 Dollars or 2 Pounds (Abroad)

प्रास्ताविकम्

'देववाणी-परिषद्, दिल्ली' संस्थायाः सद्ग्रन्थप्रकाशनरूपमप्येकमुद्देश्यमस्ति । तदनुसारमद्यावधि परिषदा इमे संस्कृतभाषानिबद्धा ग्रन्थाः प्रकाशिताः-(१) **सुगमरामायणम्** (आचार्यश्रीरमेशचन्द्रशुक्लप्रणीतं महाकाव्यम्)(२) **श्रीकृष्णचरितम्** (आचार्यश्रीरमेशचन्द्रशुक्लप्रणीतं महाकाव्यम्) (३) **कर्णभूषणम्** (डॉ० सी० आर० स्वामिनाथ-कृतं नाटकशोकगीतिप्रबन्धात्मकं रचनात्रयम्), (४) **अर्वाचीनसंस्कृतमहाकाव्यविमर्शः** (रमाकान्तशुक्लसम्पादितः खण्डद्वयात्मकः समीक्षाग्रन्थः) (५) **हरविजयस्य साहित्यिकमध्ययनम्** (डॉ० कृष्णकान्तशुक्ललिखितम्) (६) **श्रीमदप्पयदीक्षितचरितम्** (डॉ० हरिनारायणदीक्षितरचितम्) (७) **भाति मे भारतम्** (डॉ० रमाकान्तशुक्लप्रणीतं काव्यम्) (८) **भारतस्वातंत्र्यसंग्रामेतिहासः**(डॉ० रमेशचन्द्रशुक्लकृतः)। इदानीं च कविदार्शनिकपण्डितटी०वी०परमेश्वरअय्यरप्रणीतः**'आभाणकमञ्जरी'** विदुषां पुरतः प्रस्तूयते । अस्यां कृतौ अय्यरमहाभागेन भाषान्तरनिबद्धानां लोकोक्तीनां सरससंस्कृतानुवादो विहितः । आशासे सहृदया एतद्ग्रन्थप्रकाशनेन मोदमेष्यन्ति । अस्माभिरत्राग्रिमपृष्ठेषु संस्कृतांग्लभाषाभ्यां श्रीअय्यरमहाभागस्य संक्षिप्तजीवनपरिचयो दीयते येन जिज्ञासूनां मनस्तोषः स्यात् ।

परमेश्वरअय्यरः

कविर्दार्शनिकः

दक्षिणभारते सह्याद्रिपश्चिमाम्बुध्योर्मध्ये राजति केरलनामा देशः नारिकेलमरिचैलादिपादपलतानिचयैरतिरमणीयः। तत्र कुक्कुटक्रोडाभिधे नगरे पाश्चात्यैः "**कालिकट**" इति व्यवहृते '**सामूतिरि**" राजलोकानां राजधानीत्वेन परिलसिते "**कोऴिक्कोट**" इति मलयालभाषाभाषिते द्रमिडभाषाभाषिणि ब्राह्मणकुटुम्बे १९१५ तमे क्रैस्तवाब्दे जुलाईमासस्य १६ तारिकायां १८३२२३० तमे कलिवासरे श्रीमतः परमेश्वरअय्यरमहोदयस्य प्रादुर्भावः श्रीमत्याः लक्ष्मीदेव्याः श्रीमतो विश्वनाथअय्यरमहोदयस्य च तनयत्वेन समजनि। परिवारोऽयं पुरा, त्रिचतुराब्दशतकेभ्यः पूर्वं द्रमिडदेशे "**तंजाऊर**" इति प्रथिते शरभोजिमहाराजपरिपालिते भूखण्डे कृतवसतिरासीत्। कवेरस्य पूर्विकः कश्चित् तत्र राजकीयः आस्थानकविरासीत् इति श्रूयते। किन्तु अर्वाचीनसमये एतत्परिवारे न कोऽपि संस्कृतज्ञः समभूत् इति ज्ञायते। परमेश्वरअय्यरमहोदयस्य संस्कृताध्ययनं काकतालीयन्यायोदाहरणरूपत्वमावहति। १९३२ तमे संवत्सरे हाईस्कूलपरीक्षायां गणिते संस्कृते च लब्धभूयङ्कः विजयिषु छात्रेषु प्राप्तप्रथमस्थानः वटुरयं इयेष महाविद्यालयप्रविष्टिम्। पञ्चाशद्रूप्यकपरिमितात् प्रतिमासवेतनात् महाविद्यालयशुल्कभूतस्य पञ्चरूप्यकात्मकस्य महतो द्रव्यराशेः (?) व्ययः दुश्शक इति पितृचरणैः निश्चये कृते कालिजाधिकृतैः छात्रवृत्तिप्रदाने अङ्गीकृतेऽपि बहूनामितरेषां प्रश्नानां प्रादुर्भावात् हेतोः महाविद्यालयद्वारे अनुद्घाटिते अनारूढश्मश्रुर्बालो महात्म-

गान्धिमहोदयैः समारब्धे राष्ट्रियान्दोलने भागभाक्त्वेन कारागारवासमवाप। १९३३-१९३९ वत्सरेषु त्रिप्पूणित्तुरा इति प्रथिते ग्रामवल्लजे गोश्रीशैः (कोचिन्राजभिः) स्थापितायां संस्कृतपाठशालायां संस्कृताध्ययनं कृत्वा न्यायदर्शनप्रारंभिकग्रन्थावलोकनपुरस्सरं वेदान्तदर्शने संप्राप्त-"भूषण" "शिरोमणि" बिरुदद्वयः साहित्ये लब्धप्रवेशः सञ्जातः। आदौ मलयालभाषायां सञ्चालिततूलिकः पश्चात् हिन्दी-संस्कृतद्रमिडभाषा-इंग्लिशभाषास्वपि कथा-लेखादिकं व्यरचत्।

१९३९-१९७४ मध्ये शिक्षाक्षेत्रे कृतपरिश्रमः सेवापरितोषितपञ्चदशविद्यालयसंस्थानः अध्यापनवेलायामेव कृताध्ययनः प्राप्तविविधविश्वविद्यालयीयविरुदः अधीति-बोधाचरणप्रचारणात्मकं चतुर्दशत्वं स्वप्राप्तविद्यासु कृत-वान्।

१९७५-१९७९ काले स्विट्झरलैण्डदेशे सीलिस्बर्ग्-ग्रामे महर्षियूरोपियनरिसर्चविश्वविद्यालये 'संस्कृत-साहित्यप्रोफसर्'-पदमलञ्चकार। ध्यानाभ्यासेन समवाप्त-विविधकल्याणगुणगणः कविताशक्त्युपबृंहणेन नाना-विषयान् अधिकृत्य रचितश्लोकसहस्रचतुष्टयाधिकः इदानी-मपि गीर्वाणवाणीकैङ्कर्यमाचरति। यूरोपखण्डे विलायते वेस्टइण्डीजभिधेषु द्वीपसमूहेषु च कृतपर्यटनः वैदिक संस्कृतिप्रभृतीन् धार्मिकविषयान् अधिकृत्याङ्गलभाषायां प्रदत्तभाषणचयः तत्तद्देशीयानां श्लाघापात्रमभवत्।

अधुना परमेश्वरअय्यरमहोदयानां साहित्यसेवामुद्दिश्य दिग्दर्शनं क्रियते। तेषां रचनाभ्यः कांश्चित् श्लोकान् समीक्षायाः समालोचनोक्तिभ्यश्च विनैव प्रदर्शयामः येन सहृदयाः रसिकाः स्वयं जानीयुस्तेषां प्रतिभा कीदृशीति।

वैयाकरणानां मनागुरे रचितौ श्लोकौ :—

पुनः कथं स्यात् प्रथमान्तशब्दः
कथं द्वितीयान्तपदं कथं स्यात् ।
शनैस्तृतीयेति न वाच्यमद्य
विहाय शब्दो न भवेच्चतुर्थी ॥
चिरादिति स्यान्नहि पञ्चमी वा
विहस्य षष्ठीति न विद्वदुक्तिः ।
ऋते च शब्दः किमु सप्तमी स्यात्
न बुध्यते हन्त विभक्तिविद्या ॥

"गान्ध्युदन्त संक्षेपात्" कश्चित् श्लोकः :—

अध्यात्मशक्त्या किल राष्ट्रनीतिं
चक्रे पवित्रां गतकल्मषां यः ।
सत्यप्रतिष्ठामनघामहिंसा-
मार्गं च यः सन्ततमाचकांक्ष ॥

'स्विस्देशप्रकृतिवर्णनात् कश्चित् श्लोकः

तूलमार्जकशालायां कार्पासशकला इव ।
सर्वत्र च विकीर्यन्ते श्वेता हिमकणव्रजाः ॥

हिमावृते मार्गे गच्छन् कदाचित् कविः निपपात ।

तद्वर्णनपरः कश्चित् श्लोकः :—

छत्रं मल्लमहाशया द्धृतदयाद्
गृह्णन् यियासुश्च तत्-
"पत्रालीसुनिकेतनं" (डाकखाना)
हिमनिपातात्यन्तसान्द्रे पथि ।
पादप्रस्खलनान्निपत्य विलुठन्
सक्थिव्यथां प्राप्तवान्
तन्त्रीछेदकृतातपत्रविहति-
क्लेशान्वितं मे मनः ॥

स्विस्देशप्रकृतिवर्णनादपरः श्लोकः :—

अदृश्यांभस्तलेऽमुष्मिन् कासारे धूमिकावृते ।
क्षीरांभोनिधिरेवायमिति जाता मतिर्मम ॥

यैः हिमनिपातः साक्षात् दृष्टस्तैः नितरामास्वाद्योऽयं श्लोकः इति किमु वक्तव्यम् ?

शंभुस्तोत्रात्मकः कश्चित् श्लोकः

चराचरान् पातुमुदग्रवीर्यं
गरानलं पातुमियेष शंभुः ।
सुराधिनाथं सुसमृद्धिकामः
परात्परं तं प्रणमामि भक्त्या ॥

फललवनप्रवृत्तस्य कवेः स्वानुभवप्रयुक्ता विचारव्यक्तिः :—

त्वगेकदेशे स्फुटितेऽपि किंचित्
कनिष्ठिकाग्रे भवति व्यथा मे ।
पुरा भटाः शस्त्रहतांघ्रिहस्ताः
कथं भवेयुर्व्यथिता न भूयः ॥

कस्मिंश्चित् प्रसंगे "स्वातन्त्र्य" निर्वचनम् :—

आत्मा बुद्धिरपीन्द्रियाणि च मनः सर्वं च कुर्याद्वशे
न ब्रूयाद्वचनं परस्य हृदयोद्वेगस्तु यस्माद् भवेत् ।
कर्तव्यं जनताहितार्थमखिलं त्याज्यं च हिंसादिकं
स्वातन्त्र्यं हि तदुच्यते सुखकरं नोच्छृंखलत्वं पुनः ॥

तत्रैव निर्भयत्वनिरुक्तिः :—

लोकोपप्लवकारि दुर्नयवतां व्यत्यस्यतां दुष्कृति-
र्निष्ठां पालय लोभने बहुविधे साम्मुख्यमापादिते ।
न्याय्यं कर्म समाचरानवरतं प्रत्यूहरुद्धोऽपि सन्
निर्भीकत्वमुदाहृतं न खलु तद्धाष्ट्र्यं न वा साहसम् ॥

तत्रैव "आरोग्य" विवेचनम् :—

चित्तं सत्त्वगुणान्वितं नवनवोन्मेषाढ्यमुल्लासि तद्
वर्ष्माऽतन्द्रमनारतश्रमसहिष्णुद्दामवीर्यं पुनः ।
स्नायुस्फूर्तियुतं तथोपचितिमज्जानीहि यमीभिर्गुणै-
रारोग्यं परमं न केवलमभावोऽयं रुजामुच्यते ॥

"देवीनवरत्नमाला" स्तोत्रतः कश्चित् श्लोकः :—

सद्बुद्धिः किल सत्सु दातृषु वरा या दानशक्तिर्मता
मेधाशक्तिरुदीरिता बुधजनेष्वाराधिता शंभुना ।
शीलाढ्यासु पतिव्रतासु महिता या प्रेमशक्तिः स्मृता
नित्या नित्यगुणान्विता निरुपमा वन्देऽद्य तां शांभवीम् ॥

"भारतगौरवात्" कश्चित् श्लोकः :—

धर्मादपैति न मनागपि सत्त्वनिष्ठा-
दर्थान् यथावदवलम्ब्य तनोत्यभीष्टम् ।
कामानवाप्य न हि विस्मरति स्वकृत्यं
मोक्षे निवेशयति चित्तमुदग्रबोधम् ॥

कविना स्विस्‌देशीय राष्ट्रगीतं, शर्मण्यदेश राष्ट्रगीतं, स्वीडन्-देशराष्ट्रगीतं च संस्कृतश्लोकैः परावर्तितं तत्तद्देशेषु भाषणावसरे श्रावितं च । फ्रान्स्-कनाडा-अमेरिका-प्रभृतीनां देशानां वर्णनं च बहुधा कृतं वर्तते । विस्तरभयादुदाहरणानि नात्र दीयन्ते ।

साहित्यकौतुकम् इति नाम्ना कवेः अतिनूतना काचित् कृतिः वर्तते । अस्मिन् शार्दूलविक्रीडितच्छन्दोनिबद्धाः शतद्वयपरिमिताः श्लोकाः सन्ति पञ्चविंशत्यष्टकैः घटिताः । एकैकस्मिन् अष्टके शीर्षकशब्दस्य अष्टसु विभक्तिषु प्रयोगः कृतः । विषयाश्च ।

श्रीकालिदासः, योषा, द्रविणम्, विद्वान्, राष्ट्रनेता चलच्चित्रम्, सैनिकः, ग्रामः, पुरी, पत्रिका, पादपः, भारतम्, प्रेमा, भिक्षुकः, निद्रा, वस्त्रम्, वेश्म, भोजनम्, दानम्, धर्मः, भक्तिः, मोक्षश्चेति (२२) तथा च श्रीकृष्णाष्टकम्, ख्रिस्तुदेवाष्टकम्, श्रीरुद्राष्टकम् चेति त्रयं च । शीघ्रमेव ग्रन्थस्यास्य प्रकाशनमाशास्यते । विस्तरतोऽत्र नोदाहरणानि दीयन्ते । सहृदयानां मनोविनोदाय पञ्चषाः श्लोकाः प्रदर्श्यन्ते :—

अद्यत्वे सुरभारतीविषयिणी विद्याप्रवृत्तिर्गता
न्यूनत्वं भरतक्षितावपि विधेर्वामत्वहेतोर्भृशम् ।
नो जाने कति वा त्वदीयकवितामास्वादयेयुः स्वतः
साक्षात् श्वस्तनभारते मम कवे श्रीकालिदासानघ ।।

(श्रीकालिदासाष्टकात्)

बाल्ये सम्यगधीतिबोधनिरता तातेन संवर्धिता
या भर्त्रा परिपालिता प्रणयिना तारुण्यकाले मुदा ।
तस्याः शान्तिदयानिधेर्हितरतेः संपक्वबुद्धेरहो
योषाया दृढशासने स्थितवतः पुत्रस्य भाग्यं महत् ।।

(योषाष्टकात्)

खाद्यं येन तु पच्यते स दहनः क्रुद्धो भवेद्दाहकः
शाकच्छिच्छुरिका पिबेच्च रुधिरं निर्दोषहृत्स्थं बत ।
सर्वं वस्त्विह भूतलेऽस्ति विमलं भोक्ता भवेत् सात्त्विको
रे रे मित्रवरानघद्रविण ते कीर्तिर्भवत्वक्षता ।।

(द्रविणाष्टकात्)

दृश्यस्यानघरूपकस्य बहवः सन्त्यत्र भव्या गुणाः
पर्यालोचनतोऽमृतात्मकतया श्राव्यस्य साकं गुणैः ।
एवं हर्षविवर्धकाय निखिलक्षेमावहायादराद्
दत्तासीमधना जनाः खलु चलच्चित्राय हृद्याय हि ।।

(चलच्चित्राष्टकात्)

चारित्र्यं महिलाजनस्य विधिवत् संरक्षणीयं सदा
बालानामपि जीवितं बहुमतं ये भाविपौरा ध्रुवम् ।
येनेदं खलु तथ्यमादरवता विज्ञाय चाचर्यते
तेनैषा खलु सैनिकेन धरणिभव्या समुत्तंभिता ।।

(सैनिकाष्टकात्)

ग्रीष्मे तिग्मकरे तपत्यनुदिनं वर्षे सुवृष्ट्यन्विते
हैमाहेषु च शीतकम्पिततनुः पुण्यार्जनायोद्यतः ।

शश्वत् त्वां खलु लोकसंग्रहरतस्तस्मादकस्मादपि
ग्राम त्वां यदि विस्मरेयमधुना पापार्जनं मे भवेत् ॥

(ग्रामाष्टकात्)

एवं रीत्या समग्रादपि ग्रन्थात् बहून्युदाहरणानि दातुं शक्यानि। किन्तु स्थालीपुलाकन्यायेन यान्युदाहरणानि दत्तानि तैरेव काव्यस्यास्य गुणपौष्कल्यं सहृदयैः सम्यगवगम्यते हि। श्रीमतः अय्यरमहोदयस्य **सत्कथामञ्जरी पञ्चरत्नमणिमाला-भक्तितरङ्गिणी** प्रभृतयः सद्ग्रन्थाः अचिरेणैव सहृदयानां पुरतः प्रकाशितरूपेण समायास्यन्तीति आशास्यते।

एवं गीर्वाणवाणीकैङ्कर्यसन्ततदत्तचित्तस्य विनयादि सौशील्यनिधेः परमेश्वर अय्यर महोदयस्य दीर्घायुष्यं अरोगदृढगात्रत्वेन सम्पत्ति सौभाग्यसहितेन दिने दिने परिपुष्टिमेयुषा सार्धं प्रार्थ्यते ऽस्माभिः। सर्वजगन्नियन्ता सर्वज्ञः समग्रैश्वर्यप्रदाता सादरं संस्तूयते चैतदर्थम्। इति शम्

डॉ० रमाकान्त शुक्लः

१३, मई १९८१ महासचिवः, देववाणी-परिषद्, दिल्ली
आभाणकमञ्जरी ६ वाणी-विहारः, नयी दिल्ली-११००५९

The Philosopher Poet
PARAMESWAR IYER

Born on 16th July, 1915 at Calicut (Kerala), *Pt. Parameśwar Iyer* hails from a Tamil Brahmin family that can trace its antecedents to the *Āsthāna Kavis* in the court of Tanjore Kings four centuries before, but none of his immediate ancestors had much to do in the field of Sanskrit Education or Literature. It was only an accident that compelled Shri Iyer to study Sanskrit seriously. He passed his S. S. L. C. examination in 1932 with creditable marks in Sanskrit and Mathematics. He wanted to join a College for higher studies in Mathematics but his father whose salary then was about Rs. fifty per month pleaded his inability to afford Rs. six or seven per month towards College fees then. The Principal of a College was ready to grant him freeship but other problems arose and the higher education matter was shelved. The boy drifted into Politics and was imprisoned in the Gandhian movement for national independence. After a year the boy joined Cochin Maharajah's Sanskrit Pathasala at TRIPUNITTURA where he studied *Nyāya* for two years and *Vedānta* for four years and passed, *Bhooṣaṇam* and *Śiromaṇi* examinations on a par with *Āchārya*'. He took some interest in literature but wrote mainly in Malayalam. He started as a Sanskrit teacher but the Headmaster of that School gave him more work in English, Mathematics etc.

He married in 1940 and in the course of the subsequent years appeared privately for nine University Examinations and became an M. A., B. T. He was a research Scholar in the Sanskrit Department of Madras University under late *Dr. C. KUNHAN RAJAH* with '*VĀCHASPATI MIŚRA*—A study' as the subject far research. Again the problem of domestic worries and expenses confronted him and he had to discontinue Research work and take up a teaching post in a College. After a few years the partition of Andhra from Madras in 1954 and the retrenchment move in the Govt. affected him. Thereafter he worked in High Schools teaching various subjects including Sanskrit. He finally retired from a High School in 1974.

In the meantime he had written much in Sanskrit, Hindi, Malayalam, English and Tamil. In September, 1976 he joined the Maharishi European Research University at Seelisberg in Switzerland as Professor of Sanskrit Literature and returned to India in August 1979. During these 1089 days of foreign stay he visited many places in Europe, U. K., S. America & West Indies giving talks and recitation of poems to selected intellectuals of different tongues through interpreters.

He became a regular meditator by the process of Transcendental Meditation ever since he came into contact with Maharishi Mehesh Yogi. The latent poetic talent in him flourished enormously and he has composed more than 4000 verses in the course of the last five years whereas until the year 1976 his total output in the whole of his life can be reckoned as only less than a thousand verses. The high quality of literary excellence in the verses composed during the last one year entitles them to be considered his masterpiece in the opinion

of many Indian and European Sanskrit Scholars. A brief reference to some of his excellent verses has been made in the Sanskrit Biographical sketch elsewhere in this book. We shall just make a rapid survey of his published and unpublished works.

Published works :

The collection of his poems in Malayalam called *ŚITHILACINTAKAL* (1937) and the Novel *MĀTRBHUMIYUṬE MAṬITTAṬṬI-LEKKU* (1940) were his earlier attempts. He wrote many stories, Poems, essays, radio talks, plays etc. in Malayalam. He has translated many Tamil and Malayalam stories in Hindi journals. 1967-1970 Translation of *ŚIVAPURĀṆA*, *LIṄCAPURĀṆA* and *GARUḌA PURĀṆA* and two works of Acharya Rajaneesh into English, Translation of many Hindi stories into English in journals are his main works in translation *108 TIRUKKURAL* Gems (from the Tamil Classic TIRUKKURAL) with Sanskrit & Malayalam verses and Hindi and English prose, was honoured by Dr. Radhakrishnan and Dr. Zakir Husein by means of cash awards and citations. *ĀNANDAPATHAPRADARŚIKA* consists of 108 wise sayings in English with Sanskrit and Hindi renderings.

While in Switzerland he attended the third and fourth world Sanskrit Conferences in June 1977 at Paris and in May 1979 at WEIMAR (East Germany). The paper read at Paris—"Concept of Dhyana" is remarkable for some excellent Sanskrit Poems on the of Dhyana (Meditation) Principles. *BHAGAVAD GĪTAPĀDA*

ŚIVASTAVA published in 1989 contains 108 verses as a prayer to Lord SIVA. One of the feet of each one of these verses is taken from the Holy BHAGAVADGITA and the idea is aptly fitted into the general character of the prayer and these passages give a substance of the philosophy of Bhagavad Gita. Further, the main tenets of the BHAKTI system as found in Narada's *BHAKTISUTRAS* and other works are also introduced suitably. *RAGHUVĪRAPAÑCARATNAM* is a small prayer of five verses of exquisite literary quality with translations in English and Hindi. *Ābhāṇaka-Manjarī* and *Sadaśaya Samuccaya* are good collections of Proverbs and wise sayings.

Unpublished Works :

More than 3000 verses in Sanskrit have not yet been published, So also the English translations of Narada, Vayu, Brahmanda and Skanda Puranas *Satkathāmañjarī* is a collection of about fifteen story poems. He has composed more then 700 verses of prayer invoking different gods and goddesses. One remarkable feature of almost all these verses is the manner of their composition about which the poet has hinted thus :—

Rātriṣu svāpabhaṅgespi śayyāsthena mayā Kṛtāḥ
Ślokāḥ stotrātmakāḥ kecicchabdālaṅkārabhāsurāḥ.

'Prāsa' or alliteration as obtained in Kerala has been invariably used in these verses of prayer.

Enonivṛityā Paripāvanatvam
Dhyānonmukhatvañca Vivardhayanti
Manomudam bhaktajaneṣu baḍham
Tanotviyam Bhaktitaraṅgini me

is an example. *Swissdeśaprakṛtivarṇanam* contains many single verses about the natural beauty of various places in Switzerland. *Germany-yātrāvarṇanam* describes the poet's journey to various places in Germany. *Svāsthyasūktiratnāvalī* contains interesting verses about health and other allied topics. '*Sāhityakautukam*' contains 25 *Aṣṭakas* on various topics. This book can be considered the master piece of the poet. More about this with suitable examples can be known from the Sanskrit article.

Pandit Iyer's Personal Life :

Born in a lower middle class family and voluntarily choosing a life of very plain living and high thinking, he has remained throughout his life a very simple person struggling to make both ends meet—

Yena kenacidācchanno yena kenacidaśitaḥ.
Yatra kvacana śāyī syāttaṁ devā Brāhmaṇan viduḥ

This dictum is cent per cent true of Shri Iyer. He has served in about fifteen Educational Institutions (Primary to Post Graduate level) risking the ridicule of friends and relatives who used to comment—"A rolling stone never gathers moss". The KUMBHA LAGNA of his nativity, he believes to be responsible for his inability to gather a set of admirers around him despite the fact that the quality of his teaching as well as his literary output has always been of a very high order. Living a disciplined life of no extremes of any type whatsoever he is very active from three O' clock in the morning to nine at night. He finds rest in different types of activity such as teaching children, reading proofs, studying English literature, going through half a dozen daily papers regularly, writing book reviews etc. etc. much of them in the form of ghost writing with

little or no remuneration.

Unassumingly simple and modest by nature he has never alienated the sympathies of his well-wishers. Stoicism in the practical every day life has stood him in good stead. The Vedantic training in the early years years of his educational career has enabled him to brave the vicissitudes of life.

The message of his poems and philosophy of life is contained in the following verse once composed by him at the instance of some of his foreign disciples—

Hīnaṁ karma parityajan sukṛtimān sātatyato
Ꞩnuṣṭhita-
Dhyānaḥ samprati lokasaṅgraharato bhaktya-
dhvanīnastathā
Ānandaṁ paramātmabhedarahite jīve Ꞩnubhūya
svayaṁ
Jñānajyotiraśeṣadagdhaduritaḥ prāpnomi
mokṣam dhruvam

Let us pray to the Almighty to grant him the lease of a long life of vigorous literary pursuit.

(Dr.) Rama Kant Shukla
General Secratary
Devavani Parishad, Delhi
R-6 Vani Vihar, New Delhi-110059

Guru Purnima
17.7.1981

आभाणकमञ्जरी

(भाषान्तरलोकोक्तीनां संस्कृतपद्यरूपान्तरम्)

प्रणेता

श्री टी॰ वी॰ परमेश्वर अय्यरः

ĀBHĀṆAKAMAÑJARĪ

(Collection of Proverbs.)

1. He that cannot abide a market deserves not a good one.

2. Abundance like want ruins many.

3. There is no good accord where every man would be a Lord.

4. Admonish your friends in private; praise them in public.

5. Adversity makes a man wise, not rich.

6. After a storm comes a calm.

7. When all men say you are an ass. it is time to bray.

8. He that will please all men pleases none.

9. All that shakes falls not.

10. An army of stags led by a lion would be more formidable than one of lions led by a stag.

11. An arrow shot upright falls on the shooter's head.

आभाणकमञ्जरी

तितिक्षते न प्रतिकूलहट्टं हानिप्रदं यः शृणु तथ्यमेतत् ।
नार्हत्यसावापणमत्युदारं लाभप्रदं चैव मनोनुकूलम् ॥१॥

यथा विभवहीनत्वं बहुधा नाशकृन्मतम् ।
तथा सम्पत्तिबाहुल्यं दृश्यते घातकं भृशम् ॥२॥

प्रभुर्न भूपुर्यदि सर्व एव कथं भवेद् ब्रूहि तदैकमत्यम् ।
नेतारमेकं कृतिनं प्रवीणं स्वीकृत्य कुर्यादनुवृत्तिमस्य ॥३॥

अनार्यवृत्तिः सुहृदुत्तमोऽपि विविक्तदेशे ननु भर्त्सनार्हः ।
किन्त्वस्य कार्या जनमध्यगस्य श्लाघाऽपि वादं गुणलेशहेतोः॥४॥

विपत्तयो दुःखशतानि चैव प्रज्ञायुतं कुर्यु रपेतशङ्कम् ।
मर्त्यं कदाचिन्न तु वित्तवन्तमित्येव मन्ये परमार्थदृष्ट्या ॥५॥

जले वापि स्थले वापि चण्डवातादनन्तरम् ।
अवश्यं भविता शान्तिर्विक्षोभरहिता सखे ॥६॥

वालेयनाम्ना यदि मानवास्त्वां ह्वातुं हि सर्वेऽभिलषेयुरद्धा ।
अशङ्कितं निर्भयमेव हर्षात् समारभस्वारटितुं त्वरावान् । ७॥

आरिराधयिषुः सर्वानतृप्तान् कारयेदमून् ॥८॥

अस्थिरं चञ्चलं यद्यद् ध्रुवं तत्तत् पतेत् किमु ॥९॥

कुरङ्गपृतना सम्यक् पञ्चास्याधिष्ठिता ध्रुवम् ।
एणकाधिष्ठितात् सैन्याद्धरीणामपि भीषणा ॥१०॥

सायकस्तूर्ध्वमुत्क्षिप्तः शिरसि क्षिपतः पतेत् ॥११॥

12. The ass loaded with gold still eats thistles.

13. The balance distinguishes not between gold and lead.

14. If the ball does not stick to the wall it will at least leave a mark.

15. A barley corn is better than a diamond to a cock.

16. A bean in liberty is better than a comfit in prison.

17. Beg from beggars and you will never be rich.

18. Neither beg of him who has been a beggar nor serve him who has been a servant.

19. Good to begin well; better to end well.

20. He who begins many things finishes but few.

21. Believe not all that you see nor half what you hear.

22. Better be envied than be pitied.

23. Better be an old man's darling than a young man's warling.

24. Better be unmannerly than troublesome.

25. Better eyesore than all blind.

26. Better to flatter a fool than fight him.

27. Better give a penny than lend twenty.

न्यस्तहाटकपृष्ठोऽपि गर्दभो गोक्षुरादकः ॥१२॥

सीसकं हाटकं चैव तुलायां न विवेच्यते ॥१३॥

अलग्नः कन्दुकः कुड्ये चिह्नितं कुरुते हि तत् ॥१४॥

यवं हि बहु मन्येत कुक्कुटो हीरकादपि ॥१५॥

कारागृहे भीतिकरान्तरिक्षे
मिष्टान्नलब्ध्यापि भवेन्न तृप्तिः ।
स्वातन्त्र्यलब्धौ विभयस्य पुंसः
आणापि तुष्टिं मनसो विदध्यात् ॥१६॥

भिक्षुकं याचमानस्य धनाढ्यत्वं कथं भवेत् ॥१७॥

भूतपूर्वं न याचेत भिक्षुकं तु कदाचन ।
भूतपूर्वं न भृत्यं तु सेवेत च विपत्स्वपि ॥१८॥

वरं शुभसमारंभः श्रेयः शुभसमापनम् ॥१९॥

अतिमात्रकृतारंभो न किञ्चन समापयेत् ॥२०॥

प्रत्ययो दृष्टमात्रेषु श्रुतस्यार्धेऽपि नेष्यते ॥२१॥

न दयाभाजनं भूयात् सेर्ष्यं दृश्येत यद्यपि ॥२२॥

पूर्वं युवत्या मनसीत्थमासीद्वृद्धस्य कामं दयिता भवेयम् ।
विद्वेषपात्रं तरुणस्य पत्युर्भूत्वा न चैवानुभवामि दुःखम् ॥२३॥

अविनीतो वरं मर्त्यो न तु पीडाकरो दृढम् ॥२४॥

अक्षिशूलं भवेत् काम्यमन्धत्वं न कदाचन ॥२५॥

चाटूक्त्या तोषयेन्मूर्खं विग्रहस्तेन निष्फलः ॥२६॥

अपि कार्षापणं यच्छेद् ऋणनिष्को न दीयताम् ॥२७॥

28. Better go to bed supperless than to rise in debt.

29. Better go to heaven in rags than to hell in embroidery.

30. Better sit still than rise and fall,

31. Better suffer than do ill.

32. Better unborn than untaught.

33. Better to die than to lie.

34. Bind the sack before it is full.

35. He that bites on every weed must needs light on poison.

36. He that has been bitten by serpent. is afraid of a rope.

37. Who has bitter in his mouth spits not all sweet.

38. He that is a blab is a scab.

39. A black plum is as sweet as a white one.

40. A blate cat makes a proud mouse.

41. Blessed is he who expects nothing for he shall never be disappointed.

42. If blind lead the blind both shall fall into the ditch.

43. Whether you boil snow or pound it you can have but water of it.

44. Not so good to borrow as to be able to lend.

याह्यलं शयनागारमकृत्वा रात्रिभोजनम् ।
नोचितं प्रातरुत्थानमृणपीडातिसङ्कुलम् ॥२८॥

सूचिकर्मसुशिल्पाढ्यवस्त्रेण नरकं प्रति ।
मा याहि; त्रिदिवं कामं गम्यतां जीर्णवाससा ॥२९॥

आसीनत्वं हि निश्चेष्टमुत्थाय पतनाद्वरम् ॥३०॥

श्रेयान् यः सहते पीडां खलात् पीडाकराद्ध्रुवम् ॥३१॥

श्रेयस्यजननिस्तस्य मानवो यो निरक्षरः ॥३२॥

सद्यस्तु मरणं हन्त मिथ्याभाषणतो वरम् ॥३३॥

प्रसेवमपिनह्यस्व तावद्यावन्न पूर्यते ॥३४॥

कक्षं कक्षं दशेद्यो वै चर्वयेद्विषवल्लरीम् ॥३५॥

सर्पदष्टो भृशं त्रस्येद्रज्जोरपि सुदूरतः ॥३६॥

मधुरं किमु निष्ठीवेत् तिक्तसम्पूरिताननः ॥३७॥

भेदकोऽतिरहस्यस्य सिध्मवद् गर्ह्यते भृशम् ॥३८॥

असितं स्वदते नूनं सितं द्राक्षाफलं यथा ॥३९॥

सत्रपो यदि मार्जारः सदर्पो मूषिको ध्रुवम् ॥४०॥

अन्यः स्याद्भूयंनुत्पश्यन् भग्नाशः स कथं भवेत् ॥४१॥

अन्धो नयति चेदन्धं निपतेतामुभावपि ॥४२॥

पेषयन् क्वाथयन् वापि हिमान्या लभते जलम् ॥४३॥

ऋणदानक्षमत्वं स्यादृणग्रहणतो वरम् ॥४४॥

45. Borrowed garments never fit well.

46. The boughs that bear most hang lowest.

47. Neither bribe nor lose thy right.

48. Who will burn one house to warm another ?

49. Who will but a fool burn his house to get rid of the mice ?

50. The buyer needs a hundred eyes; the seller but one.

51. The camel going to seek horns lost his ears.

52. A candle lights others and consumes itself.

53. He that is carried down the stream need not row.

54. One that puts the cart before the horse is laughed at.

55. It is in vain to cast your net where there is no fish.

56. A cat in gloves catches no mice.

57. The chamber of sickness is the chapel of devotion.

58. Children are poor men's riches.

59. He that has no children knows not what is love.

60. Sometimes clemency is cruelty and cruelty clemency.

61. He who would climb the ladder must begin at the bottom.

62. Flies fall not into the shut mouth.

ऋणं कृत्वा धृतं वस्त्रं स्वांगश्लिष्टं कथं भवेत् ।।४५।।

शाखाः सत्फलभूयिष्ठा अतिवेलमधो नताः ।।४६।।

उत्कोचकलुषो मा भूर्माधिकाराच्च वञ्चितः ।।४७।।

स्वगेहं दाहयेत् को वा दित्सुरौष्ण्यं परस्य हि ।।४८।।

मूर्ख एव दहेद्गेहं मूषिकोच्छेदहेतवे ।।४९।।

जागरूकं सदा क्रेतुरक्षणामावश्यकं शतम् ।

एकेनैव हि नेत्रेण विक्रेता विजयी भवेत् ।।५०।।

उष्ट्रस्य प्राप्तुकामस्य शृङ्गं भ्रष्टं श्रुतिद्वयम् ।।५१।।

द्योतयित्वाऽखिलं कोष्ठं शान्तेयं दीपवर्तिका ।।५२।।

नद्यामनुरथं नीतः क्षेपणीं चालयेत् किमु ।।५३।।

हयस्य पुरतो युञ्जन् शकटं हास्यतां व्रजेत् ।।५४।।

कासारे निर्झरे मौख्यप्रदानायं प्रतनोति कः ।।५५।।

मूषकग्रहणाशक्तो विडालः सकरच्छदः ।।५६।।

रुग्णशय्याप्रकोष्ठो हि भक्तिसंवर्धकालयः ।।५७।।

अपत्यं हि दरिद्राणां प्राक्तनं सञ्चितं धनम् ।।५८।।

अनपत्यः कथं बुध्यात् प्रेमवात्सल्यवैभवम् ।।५९।।

कदाचित् करुणा क्रौर्यं क्रौर्यं च करुणा भवेत् ।।६०।।

आरुरुक्षुर्हि निश्रेणीमारभेत तलाद्ध्रुवम् ।।६१।।

सुदृढं पिहिते वक्त्रे वर्वणा निपतेत् कथम् ।।६२।।

63. He is a poor cook that cannot lick his fingers.

64. Hunger finds no fault with cookery.

65. The right coral needs no colouring.

66. He that corrects not small faults will not control great ones.

67. What costs little is less esteemed.

68. If the counsel be good, no matter who gave it.

69. He that will not be counselled cannot be helped.

70. A cracked bell can never sound well.

71. Crooked logs make straight fires.

72. If the staff be crooked, how can the shadow be straight ?

73. Cross the river where it is shallowest.

74. A crow is never the whiter for washing itself often.

75. A crown is no cure for the headache.

76. A crust is better than no bread.

77. What can't be cured must be endured.

78. The darkest hour is that before the dawn.

79. A dead bee makes no honey.

80. To dead and absent men there are no friends left.

स किं सूदो न यो लिह्यात् स्वाङ्गुलीमन्तरान्तरा ॥६३॥

क्षुधितः पाकविद्याया न करोति विमर्शनम् ॥६४॥

विद्रुमो निर्व्यलीकश्चेत् किमर्थं वर्णरञ्जनम् ॥६५॥

अल्पानामपि दोषाणां शोधनं न करोति यः ।
न चैव विनिगृह्णीयाद् बृहद्दोषान् कदाचन ॥६६॥

न कोऽपि बहु मन्येत वस्तु चेदल्पमूल्यकम् ॥६७॥

उपदेशो भवेद्ग्राह्यो दृष्टप्रश्नो निरर्थकः ॥६८॥

का गतिर्यदि केनापि निर्देशो नानुरुध्यते ॥६९॥

घण्टाया दरभग्नाया रवो न श्रोतृतृप्तिदः ॥७०॥

वक्रेन्धनसमुत्थोऽग्निरृजुतां नावहेत् किमु ॥७१॥

वक्रा यदि भवेद्यष्टिश्छायायामृजुता कथम् ॥७२॥

नदी गाधजला यत्र तत्रैव तरणं वरम् ॥७३॥

वायसः सन्ततस्नातः किमु शुभ्रत्वमाप्नुयात् ॥७४॥

केनापि मुकुटं नोक्तं शिरःशूलस्य भेषजम् ॥७५॥

भक्ष्याभावे भवेत् काम्या सर्वस्याप्यर्धरोटिका ॥७६॥

चिकित्सा चेन्न शक्येत का गतिः सह्यतां रुजा ॥७७॥

उषसः पूर्वमस्त्येव सूचिभेद्यं तमो महत् ॥७८॥

नोत्पादयति कुत्रापि सारघं मक्षिका मृता ॥७९॥

प्रोषितस्य परासोश्च विरलाः सुहृदो भुवि ॥८०॥

81. None so deaf as those who will not hear.

82. He that deals in dirt has aye foul fingers.

83. He that deceives me once, shame fall on him; if he deceives me twice shame fall on me.

84. Delays are not denials.

85. He who depends on another dines ill and sups worse.

86. It is easier to descend than to ascend.

87. He deserves not the sweet that will not taste the sour.

88. Desires are nourished by delays.

89. He that coveteth little has no need of much.

90. If it be sin to covet honour, I am the most offending soul alive.

91. Cowards fight when they can fly no further.

92. Destroy the nests and the birds will fly away.

93. Dinners cannot be long where dainties want.

94. Cast no dirt into the well that has given you water.

95. He who does no good does evil enough.

96. The dog bites the stone; not him that throws it.

अवश्यं बधिरभ्राता स यो न श्रोतुमिच्छति ॥८१॥

समला नूनमङ्गुल्यः कर्दमे कर्म कुर्वतः ॥८२॥

सकृन्मां योऽतिसन्धत्ते धिग् धिक् तमपकारिणम् ।
धिग् धिङ्मां मूर्खमल्पज्ञं यद्यहं द्विः प्रतारितः ॥८३॥

विलम्ब करणेनैव प्रत्याख्यानं भवेन्नहि ॥८४॥

कदन्नं स नरो भुंक्ते सन्ततं यः पराश्रितः ॥८५॥

उत्थानाद् बत सर्वेषां सुकरं ह्यवरोहणम् ॥८६॥

यो हि नास्वादयेदम्लं स मिष्टमपि नार्हति ॥८७॥

भवन्ति नितरां तीव्रा विलम्बे सति कामनाः ॥८८॥

अलुब्धः स्वल्पसन्तुष्टः किं करिष्यति भूरिणा ॥८९॥

मत्समः पातको नान्यः ख्यातिलौल्यं भवेदघम् ॥९०॥

पलायनमशक्यं चेत् कातराश्च युयुत्सवः ॥९१॥

उच्छिन्नत्वे कुलायानामुत्पतन्त्येव पक्षिणः ॥९२॥

स्वाद्वन्नविरलीभावे भुक्तिर्न चिरकालिका ॥९३॥

कूपे जीवनदे पङ्कप्रक्षेपेच्छुर्विगर्ह्यते ॥९४॥

अकृते सुकृते नूनं बुध्यतां दुष्कृतं कृतम् ॥९५॥

कदाचिदपि न क्षेप्ता पाषाणो दश्यते शुना ॥९६॥

97. A dog will not howl if you beat him with a bone. People will bear easily some rough usage if they see their advantage in it.

98. Dogs wag their tails not so much in love to you as to your bread.

99. By doing nothing we learn to do ill.

100. Every door may be shut but death's door.

101. Drawn wells are seldom dry.

102. One cannot drink and whistle at once.

103. Dry bread at home is better than roast meat abroad.

104. The dust raised by the sheep does not choke the wolf.

105. Eagles catch no flies.

106. A dwarf on Giant's shoulders sees further of the two.

107. Eagles do not breed doves.

108. It is easier to commend poverty than to endure it.

109. It is easy to keep the castle that was never besieged.

110. He that would eat the fruit must climb the tree.

111. An empty bag cannot stand upright.

112. In every fault there is folly.

सारमेयोऽस्थिखण्डेन ताडितो नैव बुक्कति ।
पीडां विगणयत्येव दभ्रलाभैकदृङ् नरः ॥९७॥

कुक्कुरो यदि धूनोति लाङ्गूलं तत्र कारणम् ।
तव हस्तस्थितोऽपूपस्तव नूनं न दर्शनम् ॥९८॥

शिक्ष्यते दुष्कृताभ्यासो न किञ्चिदपि कुर्वता ॥९९॥

ऋते मृत्योः पिधीयन्ते द्वाराणि निखिलान्यपि ॥१००॥

निरन्तरसमाकृष्टजलः कूपो न शुष्यति ॥१०१।

पिबता वारि तत्काले न कार्यो गातुमुद्यमः ॥१०२॥

प्रवासं कुर्वता लब्धान्मिष्टान्नात् परगेहतः ।
वरं स्वभवने लब्धा घृतानक्तापि रोटिका ॥१०३॥

वृकश्वासस्य कः स्तंभो मेषपादोत्थपांसुभिः ॥१०४॥

भविष्यति किमुत्क्रोशो मक्षिकाग्रहणोत्सुकः ॥१०५॥

वामनो राक्षसस्यापि लोचनाविषयं ध्रुवम् ।
सुदूरं वीक्षतेऽध्वानं राक्षसस्कन्धसंस्थितः ॥१०६॥

गरुत्मान् जनयेत् किं वा कपोतकुलमुत्सुकः ॥१०७॥

निःस्वता श्लाघ्यते कैश्चित् किन्तु नैव विषह्यते ॥१०८॥

दुर्गस्यानुपरुद्धस्य रक्षकः किं महारथः ॥१०९॥

ईहमानः फलान्यत्तुं द्रुममारोहतु ध्रुवम् ॥११०॥

रिक्ता स्थातुमभुग्ना किं प्रभविष्यति भस्त्रिका ॥१११॥

स्खलिते स्खलिते मौर्ख्यं भविता दृष्टिगोचरम् ॥११२॥

113. Everything comes to him who waits.

114. Of evil grain no good seed can come.

115. Experience without learning is better than learning without experience.

116. One eye of the master sees more than ten of the servants.

117. Who has a fair wife needs more than two eyes.

118. The eye that sees all things else sees not itself.

119. Take away the eyes from other men's writings; ears from other men's secrets and hands from other men's coins.

120. Fair words fill not the belly.

121. He that falls today may rise tomorrow.

122. To fall into sin is human; to remain in sin is devilish.

123. Whatsoever was the father of a disease, an ill diet was the mother.

124. The first faults are theirs that commit them; the second theirs that permit them.

125. Feed by measure and defy the physician.

126. To fiddle while Rome was burning.

प्रतीक्षामिह कुर्वन्तं सर्वं वस्तूपयाति हि ।।११३।।

कथं वा कुत्सितादव्रीहेः शुभबीजस्य संभवः ।।११४।।

विनापि खलु विद्वत्त्वं प्रश स्तोऽनुभवो यदि ।
श्रेयाननुभवापेतशिक्षाया इति बुध्यताम् ।।११५।।

दशभ्यो भृत्यनेत्रेभ्यो भर्तुरेकं मतं वरम् ।।११६।।

नालं नेत्रद्वयं विद्वन् भार्या रूपवती यदि ।।११७।।

समग्राण्यन्यवस्तूनि सम्यगेव प्रपश्यतः ।
न शक्तिर्हन्त नेत्रस्य कदापि स्वसमोक्षणे ।।११८।।

अपसारय भो नेत्रे लेख्यपत्रात्परस्य च ।
श्रोत्रे तद्गुह्यवृत्तेभ्यो नाणकेभ्यः करद्वयम् ।।११९।।

अपि किं चाटुवाक्येन निवृत्ता कस्यचित् क्षुधा ।।१२०।।

अद्य यो निपतेत्तस्य श्वः स्यात् किं न समुत्थितिः ।।१२१।।

मानवीयः स्वभावः स यदेष निपतेदघे ।
तत्रैव लुठता शश्वत् पिशाचत्वमुरीकृतम् ।।१२२।।

रोगस्य जनकः कोऽपि स्यान्नाम परमार्थतः ।
नूनं भुक्तिरपथ्या हि जननी मे मता दृढम् ।।१२३।।

तस्य हि प्रथमो दोषः कुकृत्यं यः समाचरेत् ।
द्वितीयो येऽनुमन्दन्ते तेषामिति हि निर्णयः ।।१२४।।

मितं च नियतं भुंक्ष्व तृणीकुरु भिषग्वरम् ।।१२५।।

गृहे दहति सारङ्गीं वादयन् हास्यतां व्रजेत् ।।१२६।।

127. He has got the fiddle but not the stick. He has books but no learning.

128. A field requires three things; fair weather, sound seed and a good husbandman.

129. To fight with one's own shadow. Imagine danger where there is none.

130. To fill the mouth with an empty spoon. Raise hopes and disappoint.

131. The filth under the white snow the sun discovers.

132. The fire which warms us at a distance will burn us when near.

133. I never love them that find fault with my shoes and give me no leather.

134. Fire and water are good servants but bad masters.

135. First thrive and then wive.

136. To flay a louse for its skin. To be miserly.

137. The fairest flowers soonest fade.

138. A fog cannot be dispelled with a fan.

139. Follow the river and you will get to the sea.

140. The folly of one man is the fortune of another.

141. Fools cut their fingers but wise men cut their thumbs.

142. Every man is a fool sometimes and none at all times.

सारङ्गी विद्यते हस्ते कोणः कुत्रापि विस्मृतः ।
स्वयमप्रतिबुद्धोऽसौ ग्रन्था गेहे सहस्रशः ॥१२७॥

आनुकूल्यं च वृष्ट्यादेः श्रमशीलः कृषीवलः ।
परिपक्वं शुभं बीजं क्षेत्रे त्रितयमिष्यते ॥१२८॥

युध्यते स प्रतिच्छायं कल्पितानर्थसञ्चयः ॥१२९॥

नितान्तं रिक्तया दर्व्या वक्त्रं पूरयति ध्रुवम् ॥१३०॥

पङ्कं शुभ्रहिमाधःस्थं अर्कहस्तैरनावृतम् ॥१३१॥

दूरे योऽग्निर्ददात्यौष्ण्यमन्तिके स दहत्यहो ॥१३२॥

उपानद्दोषमस्माकमुच्चरन् सततं हि यः ।
चर्म दातुं च नोद्युक्तस्तस्मिन् न हि रता वयम् ॥१३३॥

जलवह्नी प्रभू दुष्टौ किङ्करौ मङ्गलावहौ ॥१३४॥

अर्जयित्वा धनं भूरि कृतदारो भवेद्युवा ॥१३५॥

मक्कुणं मर्दयेन्नूनं कदर्यश्चर्महेतवे ॥१३६॥

कोमलान्येव पुष्पाणि म्लायन्ते सुतरां द्रुतम् ॥१३७॥

व्यजनं चालयन् को वा मिहिकामपसारयेत् ॥१३८॥

नदीमनुसरन् नूनं समुद्रमुपयास्यसि ॥१३९॥

कदाचिन्मौर्ख्यमेकस्य परसौभाग्यमावहेत् ॥१४०॥

अङ्गुलिश्छिद्यते मूर्खैर्विदुषाऽङ्गुष्ठ एव च ॥१४१॥

कदाचित् कुत्रचिद्वापि सर्वे मूर्खा भवन्ति हि ।
न कोऽपि भविता मूर्खः सर्वदेति मतिर्मम ॥१४२॥

143. A fool may ask more questions in an hour than a wise man can answer in seven years.

144. If fools went not to market bad wares would not be sold.

145. If we are bound to forgive an enemy, we are not bound to trust him.

146. Fortune to one is mother; to another is step-mother.

147. Butter and guests stink in three days.

148. Frugality is the mother of liberality.

149. There are many in the world like the gardener's dogs that neither eat the cabbage themselves nor let others too.

150. Give a loaf and beg a slice !

151. The gear that is gifted is never so sweet as the gear that as won.

152. Give neither counsel nor salt till you are asked for it.

153. Who gives to all denies all.

154. He gives twice who gives quickly.

155. Giving away what you do not want yourselves is Gloucester kindness.

156. Go down the ladder when you marry; go up when you choose a friend.

157. The cow that gives a good pail of milk casts it all down with her foot. (After doing a piece of good service some one spoils the grace by misbehaviour.)

कुरुते तावतः प्रश्नान् होरान्तर्मौख्यंतो नरः ।
विद्वद्भिरसमाधेयान् ध्रुवं वर्षेषु सप्तसु ।।१४३।।

न गच्छेद्धनुकं मूर्खो दुर्माण्डानां नु का गतिः ।।१४४।।

अरातिः क्षम्यतां तस्मिन् श्रद्दध्यादिति नोच्यते ।।१४५।।

अतिस्नेहवती माता कस्यचिद् भाग्यदेवता ।
अपरस्य भवेत् सैव विमाता विदया दृढम् ।।१४६।।

अतिथिर्नवनीतं च रक्ष्यते दिवसत्रयम् ।।१४७।।

मितव्ययरतः पश्चाद् दानी भवितुमर्हति ।।१४८।।

भवन्ति बहवो लोके शाकरस्यैव कुक्कुराः ।
इतरान् नानुमन्यन्ते खादन्त्यपि च न स्वयम् ।।१४९।।

समग्रां रोटिकां दत्त्वा याचेत शकलं कथम् ।।१५०।।

स्वप्रयत्नार्जितं द्रव्यं दानलब्धाद्वरं मतम् ।।१५१।।

लवणं वोपदेशं वा न यच्छेद्यदि नार्थितः ।।१५२।।

रतो दातुं च सर्वस्मै वञ्चितान् कुरुतेऽखिलान् ।।१५३।।

शीघ्रं यच्छन् भवेन्नूनं द्विगुणार्थप्रदायकः ।।१५४।।

अनपेक्षितवस्तूनां दायको नैव कीर्त्यते ।।१५५।।

निश्रेण्याः खलु गच्छाधः पाणिग्रहणकर्मणि ।
आरोहोपरि मित्रस्य चयने भद्रमस्तु ते ।।१५६।।

प्रदाय बहुलं दुग्धं तया वै रुष्टया गवा ।
सर्वमेव कृतं नष्टं पादेनाहतपात्रया ।।१५७।।

158. God gives the milk but not the pail. Manly effort must supplement divine kindness.

159. He that goes softly goes safely.

160- Gold goes in at any gate except heaven's.

161. When we have gold we are in fear; when we have none we are in danger.

162. He who greases his wheels helps his oxen.

163. A great man and a great river are often ill-neighbours.

164. He that has a great nose thinks that everybody is speaking of it. People sensitive of guilt are suspicious.

165. There would be no great ones if there were no little ones.

166. In a great river great fish are found; but take heed lest you be drowned.

167. A great ship requires deep waters.

168. Instruments sound sweetest when they be touched softest.

169. One cannot make sweet music with great blows.

170. It is hard for a greedy eye to have a loyal heart.

171. No hair is so small but has its shadow.

172. One hand washes the other and both the face.

173. He that handles thorns shall prick his fingers.

दुग्धं प्रददतेशेन भाजनं नैव दीयते ।
पौरुषस्य हि माहात्म्यं प्रकटीकुर्वता ध्रुवम् ॥१५८॥

कुर्वन् हि गमनं मन्दं नूनं याति सुरक्षितः ॥१५९॥

काञ्चनं न विशेत् कुत्र स्वर्गद्वारादृते वद ॥१६०॥

अनिमात्रं भयोद्विग्नास्ते ये सम्प्राप्तकाञ्चनाः ।
किन्तु निष्काञ्चना नूनं वर्तन्ते विपदि स्वयम् ॥१६१॥

तैललेपकरश्चक्रे वृषभाणां श्रमापहः ॥१६२॥

प्रख्यातश्च नरस्तद्वद्भरितोया महानदी ।
प्रातिवेशिकरूपेण नातिश्लाघ्यौ मतौ मम ॥१६३॥

नासिका यस्य दीर्घा स्यात् सदेत्थं चिन्तयत्यहो ।
एष मे नासिकां दृष्ट्वा विमर्शनकुतूहली ॥१६४॥

गुरूणामप्यभावः स्याल्लघूनामनुपस्थितौ ॥१६५॥

कामं दृश्या महानद्यां महामत्स्या न संशयः ।
अगाधे तद्गते किन्तु जले स्यान्मृत्युरप्यहो ॥१६६॥

गुरुर्भवति नौका चेदगाधं जलमिष्यते ॥१६७॥

मृदुस्पर्शाद्रसं रम्यं ततादिकमुदीरयेत् ॥१६८॥

सुश्राव्यं गीतपीयूषं तीव्राघातान्न जायते ॥१६९॥

भवतं हृल्लुब्धदृष्टिश्च वर्तते नैकवर्ष्मणि ॥१७०॥

स्वल्पस्यापि भवेल्लोम्नः स्वल्पा छाया न संशयः ॥१७१॥

करो ह्येकोऽपरं धौति द्वावुभौ वदनं पुनः ॥१७२॥

कृतकण्टकसम्पर्को विद्धाङ्गुलिरसंशयम् ॥१७३॥

174. Hard words break no bones.

175. Hares may pull dead lions by the beard.

176. The same heat that melts the wax will harden the clay.

177. He that would have what he has not should do what he does not.

178. For the same man to be a heretic and a good subject is impossible.

179. The highest branch is not the safest roost.

180. Honest men marry soon; wise men not at all.

181. Make yourself all honey and the flies will devour you.

182. He that hopes not for good fears not evil.

183. You cannot make a horn of a pig's tail.

184. They that will not work in sunshine must hunger in frost.

185. Ignorance is the mother of impudence.

186. Industry is fortune's right hand and frugality her left.

187. He that scratches a bear must have iron nails.

188. I will not keep a dog and bark myself.

189. Keep your eyes wide open before marriage and half-shut afterwards.

अस्ति वा कोऽपि भिन्नास्थिर्वाक्शरप्रहराद्वद ॥१७४॥

मृतसिंहस्य दन्तांश्च गणयेच्छशको मुदा ॥१७५॥

औष्ण्येन विगलेल्लाक्षा येन मृत्स्ना घनीकृता ॥१७६॥

कांक्षसे यदि तत् प्राप्तुमद्य यन्नास्ति ते खलु ।
आरभेथा द्रुतं कर्तुं नाद्य यत् कुरुषे स्वयम् ॥१७७॥

म्रियते नैव पाषण्डैः सदाचारयुताः प्रजाः ॥१७८॥

सर्वोच्चा द्रुमशाखा ते रक्षास्थानं कथं भवेत् ॥१७९॥

सत्यसन्धो न तु प्राज्ञः कृतदारो भवेद्द्रुतम् ॥१८०॥

मधुपूर्णो भवेस्तर्हि त्वां गलेयुर्हि मक्षिकाः ॥१८१॥

यस्य भद्रस्य नाशास्ति स भीतो नास्त्यभद्रतः ॥१८२॥

कथं सूकरपुच्छेन भवेच्छृङ्गस्य निर्मितिः ॥१८३॥

अप्रयत्नरता ग्रीष्मे क्षुधिताः शिशिरे दृढम् ॥१८४॥

अज्ञता हि भवेद्धन्त वैयात्यजननी ध्रुवम् ॥१८५॥

सन्ततोद्यमशीलत्वं श्रीदेव्या दक्षिणः करः ।
मितव्ययरतिश्चैव वामहस्तः प्रकीर्त्यते ॥१८६॥

ऋक्षकण्डूयनोद्युक्तो नखे लोहमयो भवेत् ॥१८७॥

यदि मे कुक्कुरः पार्श्वे बुक्केयं न कदाचन ॥१८८॥

पाणिग्रहणतः पूर्वं सम्यगुन्मीलिताक्षिणा ।
भवितव्यं सदैवार्धनिमीलितदृशा ततः ॥१८९॥

190. None can guess the jewel by the casket.

191. You never know what you can do till you try.

192. We never know the worth of water till the well is dry.

193. Men know where they were born not where they shall die.

194. Knowledge makes one laugh but wealth makes one dance.

195. In the world, who knows not to swim goes to the bottom.

196. Labour is light where love doth pay.

197. Our last garment is made without pockets.

198. Wooden sword in an ivory sheath.

199. He is lifeless that is faultless.

200. Make haste when you ascend but not when you descend.

201. In life you loved him not; in death you bewail him.

202. Light burdens carried far are heavy.

203. A nimble mother makes a lazy daughter.

204. A little bird is content with a little nest.

205. Little fishes slip through nets but great fishes are taken.

भूषणस्य कथं मूल्यं वदेद् दृष्ट्वास्य पेटकम् ॥१९०॥

कार्यशक्तिं न जानासि यावन्न यतसे स्वयम् ॥१९१॥

अंभसः खलु माहात्म्यं हन्त तावन्न बुध्यते ।
यावद्धि न भवेच्छुष्कः कूपो भवनसंस्थितः ॥१९२॥

जन्मदेशं नरो वेत्ति मृतिस्थानं न कोऽपि हि ॥१९३॥

लब्धवित्तो नरो नृत्येल्लब्धज्ञानो हसेत्तथा ॥१९४॥

यथा वाप्यां भवेत् तद्वल्लोकेऽपि च सुविस्तृते ।
अशक्यतरणो नूनं निमज्ज्य मृतिमाप्नुयात् ॥१९५॥

यत्र प्रेम भवेत् प्राप्यं तत्र मोदप्रदः श्रमः ॥१९६॥

अस्माकं चरमं वस्त्रं स्यूतकोशविवर्जितम् ॥१९७॥

नागदन्तकृते कोशे क्षिप्तोऽसिः काष्टनिर्मितः ॥१९८॥

निर्जीवः सुतरां मर्त्यो यो भवेद् दोषवर्जितः ॥१९९॥

शैघ्र्यमारोहतो भूयान्मा तेऽवतरतोऽस्तु तत् ॥२००॥

जीवन् स न दयापात्रं मृतं तमनुशोचसि ॥२०१॥

सुतरां लघवो भारा दूरं नीताः श्रमावहाः ॥२०२॥

जननी चेत् क्रियाशीला ध्रुवं पुत्री सदालसा ॥२०३॥

नीडेन लघुना तुष्टः सुतरां विहगो लघुः ॥२०४॥

लघवो जालनिष्क्रान्ता गृहीता गुरवो झषाः ॥२०५॥

206. Little sticks kindle the fire but great ones put it out.

207. A little wind kindles the fire; but too much puts it out.

208. Look not for musk in a dog's kennel.

209. The love of money and the love of learning rarely meet.

210. No man loves his fetters be they made of gold.

211. He that loves the tree loves the branches too.

212. One mad action is not enough to prove a man mad.

213. For mad words deaf ears.

214. He that makes himself a sheep shall be eaten by the wolf.

215. He who makes no mistakes makes nothing.

216. A man at five may be a fool at fifteen.

217. Many dishes make many diseases.

218. He that marries for wealth sells his liberty.

219. Marriage halves our griefs; doubles our joys and quadruples our expenses.

220. He that measures oil anoints his fingers.

221. Mercy to the criminal may be cruelty to the people.

वह्निमुत्तेजयन्त्येव शुष्केध्मशकलान्यपि ।
परन्तु गुरुकाष्ठानि नूनं निर्वापयन्ति तम् ॥२०६॥

मन्दो वहति चेद्वायुर्वह्निर्भवति दीपितः ।
स एव हि वहन् वेगाद्वह्निं निर्वापयत्यहो ॥२०७॥

कस्तूरी बहलामोदा शुनः कोष्ठे न मृग्यते ॥२०८॥

विद्याद्रविणयोः प्रेमा युगपन्न भवत्यहो ॥२०९।

नरः कोऽपि न कांक्षेत निगडं हेमनिर्मितम् ॥२१०॥

स्निग्धश्चेत् पादपे नूनं शाखास्वपि भवेत्तथा ॥२११॥

मूर्खकृत्येन चैकेन वातूलः किं भवेन्नरः ॥२१२॥

नूनं बधिरवद् भूयाः सदा मूर्खे प्रजल्पति ॥२१३॥

वृकेणाद्येत निश्शङ्कं मेषो यदि भवेत् स्वयम् ॥२१४॥

यो न वै स्खलितं कुर्यान्नैव किञ्चित् करोति सः ॥२१५॥

पञ्चमे वयसि प्रौढो मूर्खः पञ्चदशे दृढम् ॥२१६॥

नूनं खाद्यबहुत्वेन बाहुल्यं स्याद्रुजामपि ॥२१७॥

स्वातन्त्र्यं खलु विक्रीतं कृतोद्वाहेन सम्पदे ॥२१८॥

कृते परिणये दुःखमुच्यतेऽर्धीभविष्यति ।
प्रीतिर्द्विगुणितापि स्याद् व्ययो नूनं चतुर्गुणः ॥२१९॥

तैलमापनकर्ता चेत् तैलाक्ता नूनमङ्गुलिः ॥२२०।

अपराधिषु कारुण्यं पारुष्यं जनतां प्रति ॥२२१॥

222. Music helps not the toothache.

223. Never catch at a falling knife or a falling friend.

224. Nature has given us two ears and two eyes but one tongue to the end we should hear and see more than we speak.

225. He that never climbed never fell.

226. No man knows when or where he will die though he knows he must die,

227. A nod for a wise man and a rod for a fool.

228. He that is not contented has nothing.

229. He that has nothing need fear to lose nothing.

230. Nothing must be done hastily but killing flies.

231. He that once deceives is ever suspected.

232. Pluck not where you never planted.

233. If you run after two hares you will catch neither.

234. It is not by saying "Honey, Honey" that sweetness comes into the mouth.

235. To empty the sea with a spoon.

236. He that speaks what he should not hears what he would not.

237. It never troubles the wolf how many the sheep be.

238. Oaks may fall when reeds stand the storm.

न गच्छेच्छत्रणाद्गोतेर्दन्तपीडा कदाचन ॥२२२॥

पतन्तं न तु गृह्णीयात् क्षुरं च सुहृदं तथा ॥२२३॥

विधात्रा सृजता दत्तं नेत्रश्रोत्रद्वयं परम् ।
जिह्वैका तेन मा ब्रूहि यद्यद् दृष्टं श्रुतं तथा ॥२२४॥

अनारोहन् कथं वा स्यान्मानवः पतितो भुवि ॥२२५॥

कदा कुत्रेति को ब्रूयादवश्यं भविता मृतिः ॥२२६॥

दृष्टिचालनतः प्राज्ञो मूर्खश्चेद्यष्टिचालनात् ।
द्वावप्येवं वशीकार्यौ विदुषा फलकांक्षिणा ॥२२७॥

अतृप्तो लोलुपो मर्त्यो मतो नूनमकिञ्चनः ॥२२८॥

भ्रष्टं किं वा भवेत्तस्य यत्सकाशे न किञ्चन ॥२२९॥

त्वरा कार्या न कुत्रापि मक्षिकामारणादृते ॥२३०॥

शङ्क्यते हि सदैवासौ सकृद्यः कृतकिल्बिषः ॥२३१॥

अनारोपितवृक्षेण नादेया फलसन्ततिः ॥२३२॥

स नैकमपि गृह्णीयादनुधावन् शशद्वयम् ॥२३३॥

कथं स्यात्प्राप्तमाधुर्यो ब्रुवन् हि "मधु मध्वि"ति ॥२३४॥

निर्जलं कर्तुमुद्युक्तः स दर्व्या जलधिं बत ॥२३५॥

अवाच्यं प्रलपन् नूनमश्रव्यं शृणुयान्नरः ॥२३६॥

किं मेषगणनाचिन्ताव्यथावान् भविता वृकः ॥२३७॥

सालाद्या उन्नता वृक्षा झंझावातेन पातिताः ।
किन्तु वेतसशष्पाद्याः संस्थिता हि यथा पुरा ॥२३८॥

239. Small sorrows speak; great ones are silent.

240. One flower makes no garland.

241. He that has one hog makes him fat; he that has one son makes him a fool.

242. Pain is forgotten where gain follows.

243. He came safe from East Indies but was drowned in the Thames.

244. Poverty is a pain and inconvenience; but no disgrace or crime.

245. Praise makes good men better and bad men worse.

246. He that pries into every cloud may be stricken with thunderbolt.

247. Scabby heads love not the comb.

248. To set one's house on fire to run away by the light of it.

249. He who hath no money in his purse must have honey in his mouth.

250. He that has not silver in his purse should have silk on his tongue.

251. A still tongue makes a wise head.

252. When the tree is fallen every one runs to it with his axe.

253. It is time to yoke when the cart comes to the horse.

254. It is time to set in when the oven comes to the dough.

महान् मूको हि सन्तापो मुखरा च लघुव्यथा ॥२३९॥

अपि स्याद्ग्रथिता माला पुष्पेणैकेन कुत्रचित् ॥२४०॥

सूकरं पालयन्नेकं सुपुष्टं हि करोति तम् ।
एकपुत्रयुतो मर्त्यो मूर्खं धृष्टं करोति तम् ॥२४१॥

प्राप्तो भवति चेल्लाभो विस्मृता भवति व्यथा ॥२४२॥

तीर्थयात्रां विधायाशु निमग्नः पल्वले मृतः ॥२४३॥

असौकर्यप्रदं नूनं दारिद्र्यं भूरिदुःखकृत् ।
अपमानकरं नेदमपराधोऽपि नैव च ॥२४४॥

भूयो भूयः प्रशंसायां कृतायां किं भवेच्छृणु ।
गुणी भद्रतरो भूयाद् दुष्टो गर्ह्यतरस्तथा ॥२४५॥

सूक्ष्मप्रेषितदृष्टिश्चेन्नरः स्यादम्बुदेऽम्बुदे ।
अचिरेण भवत्येव तडित्सन्ताडितो भृशम् ॥२४६॥

पामावृतशिरस्कस्य कङ्कती न भवेत् प्रिया ॥२४७॥

मार्गदीपनहेतोः किं गेहं दग्धं करिष्यति ॥२४८॥

भस्त्रायां रूप्यकाभावे मधु स्याद्रसनाग्रतः ॥२४९॥

भस्त्रा रजतशून्या चेज्जिह्वां क्षौमावृतां कुरु ॥२५०॥

नात्यन्तचपला जिह्वा प्राज्ञशीर्षस्य सूचिका ॥२५१॥

भूतले पतिते वृक्षे सर्वे तं छेत्तुमागताः ॥२५२॥

अश्वं शकटिकाभ्येति प्राप्तकालः समागमः ॥२५३॥

सक्तुमभ्येति चेच्चुल्ली कालः प्राप्तो हि मिश्रणे ॥२५४॥

255. To set the tortoise to catch the hare.

256. Do not keep faith in dry branches.

257. Truth has a good face but bad clothes.

258. Truths and roses have thorns about them.

259. Without wisdom wealth is worthless.

260. A valiant man's look is more than a coward's sword.

261. Used key is always bright.

262. In too much dispute truth is lost.

263. If the wife is blind and the husband is deaf that house will be quiet always.

264. If there is plenty, grain is like husk; if there is famine the husk is like grain.

को वा संप्रेषयेत्कूर्मं शशग्रहणहेतवे ॥२५५॥

विश्वासो नैव शुष्कासु कार्यः शाखासु शाखिनः ॥२५६॥

अभद्राणि तु वासांसि सत्यस्य वदनं शुभम् ॥२५७॥

ओड्रपुष्पं तथा सत्यं ध्रुवं कण्टकसंवृतम् ॥२५८॥

किं करिष्यति वित्तेन विवेकमतिवर्जितः ॥२५९॥

कातरस्यापि निस्त्रिंशाच्छूरदृष्टिर्बलीयसी ॥२६०॥

नितरां श्लक्ष्णतामृच्छेदुपयुक्ता नु कुञ्चिका ॥२६१॥

तथ्यं नष्टं भवेन्नूनं विवादे बहुले बत ॥२६२॥

अन्धा भवति चेत्पत्नी भर्ता च बधिरस्तथा।
तद्गृहं शान्तमत्यन्तं भवेदिति मतिर्मम ॥२६३॥

सुभिक्षं यदि वर्तेत धान्यं तुषसमं मतम्।
समापतति दुष्काले नूनं धान्यसमास्तुषाः ॥२६४॥

देववाणी-परिषदा प्रकाशिताः
संग्रहणीया ग्रन्थाः

१.	अर्वाचीनसंस्कृतमहाकाव्यविमर्शः (प्रथमखण्डः) (सं० : डॉ० रमाकान्तशुक्लः) (दुष्प्राप्यः)	रु० १५.००
२.	अर्वाचीनसंस्कृतमहाकाव्यविमर्शः (द्वितीयखण्डः) (सं० : डॉ० रमाकान्तशुक्लः)	रु० ३०.००
३.	कर्णभूषणम् (डॉ० सी० आर० स्वामिनाथन्) (पेपरबैक)	रु० ५.००
४.	देववाणीदर्शनम् (दुष्प्राप्यम्)	रु० ५०.००
५.	भाति मे भारतम् (काव्यम्)(प्रणेता-डॉ० रमाकान्तशुक्लः)	रु० ४०.००
६.	श्रीकृष्णचरितम् (उ०प्र०शासन-पुरस्कृतं महाकाव्यम्) (प्रणेता-डॉ० रमेशचन्द्रशुक्लः)	रु० ३०.००
७.	सुगमरामायणम् (उ०प्र०-हरियाणा-शासन-पुरस्कृतं महाकाव्यम्) (प्रणेता-डॉ० रमेशचन्द्रशुक्लः)	रु० ३५.००
८.	हरविजयस्य साहित्यिकमध्ययनम् (डॉ० कृष्णकान्तशुक्लः)	रु० ६०.००
९.	श्रीमदप्पयदीक्षितचरितम् (गद्यकाव्यम्) (डॉ० हरिनारायणदीक्षितः)	रु० २०.००
१०.	भारतस्वातन्त्र्यसंग्रामेतिहासः (डॉ० रमेशचन्द्रशुक्लः)	रु० ३५.००
११.	सदाशयसमुच्चयः (प्रणेता-श्री टी० वी० परमेश्वर अय्यरः)	रु० १५.००
१२.	आभाणकमञ्जरी (प्रणेता-श्री टी० वी० परमेश्वर अय्यरः)	रु० १५.००
१३.	मेघदूत : एक विश्लेषण (लेखक : डॉ० देवीदत्त शर्मा)	रु० २०.००
१४.	रघुवंश : एक विश्लेषण (,, ,,)	रु० २०.००
१५.	अभिज्ञानशाकुन्तल : एक विश्लेषण (,, ,,)	रु० २०.००
१६.	कालिदास की कला और संस्कृति (भाग २) (,, ,,)	रु० ६०.००

प्राप्तिस्थाने

१. 'देववाणी-परिषद्, दिल्ली' ६ वाणी-विहारः, नयी दिल्ली-११००५९

२. सुधाकमल ग्रन्थालय, २६४, उत्तरी गांधी कालौनी, मुजफ्फरनगर